तदभावापादनं साधर्म्यसमा१ वैधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं वैधर्म्यसमा२। तत्र साधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यद्यनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याद्वाऽनित्यः स्यान्नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्यः वैधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् आकाशवद्वेति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्य इति अत्र साधर्म्यत्वमात्रं वैधर्म्यत्वमात्रं वा गमकतौपयिकमित्यभिमानात् सत्प्रतिपक्षदेशनाभासे चेमे अनैकान्तिकदेशनाभासे इति वार्त्तिके त्वनैकान्तिकपदं योगात्सत्प्रतिपक्षपरं एकान्ततः साध्यसाधकत्वाभावात्” वृत्तिः।

“गोत्वाद्गोसिद्धिवत् तत्सिद्धिः” सू०।

“अनयोरसदुत्तरत्वे वीजमाह। गोत्वात् गोसिद्धिर्गौव्यवहार इति सम्प्रदायः वयन्तु गोत्वाद्भवेतरासमवेतत्वे सति गोसमवेतात्सास्नादितः, एतेन व्याप्तिपक्षधर्म्मत्वे दर्शिते गोर्गोत्वस्य तादात्म्येन गोरेव वा सिद्धिर्यथा तथैव कृतकत्वादपि व्याप्तिपक्षधर्म्मतासहितादनित्यत्वसिद्धिर्नतु व्याप्तिपक्षधर्मतारहितात् साधर्म्यमात्रात्, तथा सति अदूषकसाधर्म्यात्प्रमेयत्वादितस्तद्वचनमप्यदूषकं स्यादित्ययं विशेषः” वृत्तिः।

“साध्यदृष्टान्तयोर्धर्म्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः” ३।४।५।६।७।८ सू०

“क्रमप्राप्तं जातिषट्कं निरूपयति। उत्कर्षेण सम उत्कर्षसमः३एवमपकर्षसमोऽपि४ वर्ण्यावर्ण्य साध्येति भावप्रधानो निर्द्देशः वर्ण्यत्वादिना समो वर्ण्यसमादिः ५।६।७।८। अविद्यमानधर्म्मारोप उत्कर्षः विद्यमानधर्म्मापचयोऽपकर्षः वर्ण्यत्वं वर्णनीयत्वं तच्च सन्दिग्धसाध्यकत्वादि तदभावोऽवर्ण्यत्वं विकल्पो द्वैविध्यं साध्यत्वं पञ्चावयवसाधनीयत्वं साध्यदृष्टान्तयोर्धर्मविकल्पादिति पञ्चानामुत्थानवीजम् उभयसाध्यत्वादिति षष्ठस्य। तदयमर्थः साध्यतेऽत्रेति साध्यं पक्षः तथा च साध्यदृष्टान्तयोरित्यस्य पक्षदृष्टान्तयोरन्यतरस्मिन्नित्यर्थः धर्मविकल्पो धर्म्मस्य वैचित्र्यं तच्च क्वचित्सत्त्वं क्वचिदसत्त्वं प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात्सत्त्वाद्योऽविद्यमानधर्म्मारोपः स उत्कर्षसमः व्याप्तिमपुरस्कृत्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेणाविद्यमानधर्मप्रसञ्जनं उत्कर्षसमः३ इति फलितार्थः। यथा शब्दोऽनित्यः कृतकत्वादिति स्थापनायाम् अनित्यत्वं कृतकत्वं घटे रूपसहचरितमतः शब्दोऽपि रूपवान् स्यात् तथा च विवक्षितविपरीतसाधनाद्विशेषविरुद्धो हेतुस्तद्देशनाभासा चेयम्। एवं श्रावणशब्दसाधर्म्यात् कृतकत्वाद्घटोऽपि श्रावणः स्यादविशेषात्। वस्तुतस्तु घटे श्रावणत्वापादनेऽर्थान्तरमत उक्तलक्षणे दृष्टान्तपदं साध्यपदञ्च न देयम्। अपकर्षसमायान्तु धर्मविकल्पः धर्मस्य सहचरितधर्मस्य विकल्पोऽसत्त्वं ततः अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनं तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्म्माभावेन हेतुसाध्यान्यतराभावप्रसञ्जनमपकर्षसमः४ यथा शब्दोऽनित्यः कृतकत्वादित्यत्र यद्यनित्यसहचरितघटधर्म्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मरूपवत्त्वव्यावृत्त्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यात्। आद्येऽसिद्धिदेशना द्वितीये बाधदेशना, एवं शब्दे कृतकत्वसहचरितश्रावणत्वस्य संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्त्या घटेऽनित्यत्वं कृतकत्वञ्च व्यावर्त्तेतेति दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासाऽपीयम्। यत्तु वार्त्तिके शब्दो नीरूप इति घटोऽपि नीरूपः स्यादित्यपकर्ष इति. तदसत् घटे नीरूपत्वापादनस्यार्थान्तरत्वात् आचार्य्यस्वरसोऽप्येवं यत्तु वैधर्म्यसमाया अत्रैवान्तर्भावः स्यादिति तन्न उपधेयसङ्करेऽप्युपाधेरसङ्करात् वर्ण्यसमायान्तु साध्यः सिद्ध्यभाववान् सन्दिग्धसाध्यकादिर्वा तस्य धर्मः सन्दिग्धसाध्यकादिवृत्तिर्हेतुस्तस्य विकल्पात्सत्त्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्यापादनं वर्ण्यसमः५। तदयमर्थः पक्षवृत्तिर्हेतुर्हि गमकः पक्षश्च सन्दिग्धसाध्यकस्तथा च सन्दिग्धसाध्यकवृत्तिर्हेतुस्तथा दृष्टान्तेऽपि स्वीकार्य्यः तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात् सपक्षवृत्तित्वानिश्चयादसाधारणो हेतुस्तद्देशनाभासा चेयम्। हेतुः सन्दिग्धसाध्यकवृत्तिर्यदि न दृष्टान्ते तदा गमकहेत्वभावात् साधनविकल्पो दृष्टान्तः स्यादिति भावः। अवर्ण्यसमायान्तु दृष्टान्ते सिद्धसाध्यके यो धर्म्मो हेतुस्तस्य सत्त्वात् पक्षे शब्दादावसन्दिग्धसाध्यकत्वापादनमवर्ण्यसमा६ दृष्टान्ते हेतोर्यादृशत्वं तादृशो हेतुरेव गमक इत्यभिमानेन एवमापादनं दृष्टान्ते यो हेतुः सिद्धसाध्यकवृत्तिः स चेन्न पक्षे तदा गमकहेत्वभावात् स्वरूपासिद्धिः स्यादतस्तादृशो हेतुरवश्यं पक्षत्वाभिमते स्वीकार्य्यः तथा च सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावा-